हर्षकीर्तिकृतस्य धातुतरङ्गिण्याः पाठसमीक्षा, अध्ययनं सम्पादनञ्च।

(Critical edition and study of dhātutaraṅgiṇī of harṣakīrti)

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य विद्यावारिधि इत्युपाधये
करिष्यमाणस्य शोधकार्यस्य शोधप्रस्तावसंक्षिप्तिका

शोधकर्ता

वीतरागबाळासाहेबवसवाडे

मार्गदर्शकः

डॉ. जयवन्तचौधरी

सहा. प्राध्यापकः, व्याकरण विभागः,

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम् (महाराष्ट्रम्)

व्याकरण विभागः,

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम् (महाराष्ट्रम्)

२०२३ – २०२४

हर्षकीर्तिकृतस्य धातुतरङ्गिण्याः पाठसमीक्षा, अध्ययनं सम्पादनञ्च।

(Critical edition and study of dhātutaraṅgiṇī of harṣakīrti)

प्रास्ताविकम् –

संस्कृतभाषा विश्वस्य प्राचीनतमा श्रेष्ठा प्रेष्ठा च भाषा वर्तते। न केवलेयं भाषा अपितु विद्या वर्तते। एतस्याः विपुलवाङ्मयं वर्णनातीतम्। एतस्याः प्रशस्तं भव्यं च स्वरूपमद्यावधि स्वकीय-वैशिष्ट्येन विश्वमानसं मोहयति। संस्कृतविद्यायाः विशालभाण्डारागारे व्याकरणमेकमनुपमं रत्नं विद्यते। एतादृशं वैज्ञानिकं विस्तृतं च व्याकरणं विश्वस्मिन्जगति कस्याश्चिदपि भाषायाः नास्ति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणमिति व्युत्पत्या शब्दानां शुद्धस्वरूपस्य निष्पादनं व्याकरणस्य महत्वपूर्णं दायित्वम्।

धातुपाठस्य टीकेयं नाम्ना धातुतरङ्गिणी।[1]

प्रक्षालयतु विज्ञानामज्ञानमलमान्तरम् ॥

पाणिनीयेतर व्याकरणेषु अन्यतमं सारस्वतव्याकरणमिति। अस्य व्याकरणस्य रचना अनुभूतिस्वरूपाचर्येण देव्याः सरस्वत्याः विशेषानुकम्पया कृता अतः अस्य नामकरणं सारस्वतव्याकरमिति प्रसिद्धम्।

अस्य व्याकरणस्य प्रथमधातुपाठः हर्षकीर्तिना रचितम्। तथा तस्योपरि धातुतरङ्गिणी इति नाम्ना स्वोपज्ञवृत्तिरपि लिखिता। हर्षकीर्तिः सारस्वतव्याकरण्स्य प्रसिद्धटीकाकारः चन्द्रकीर्तिः इत्यस्य पट्टशिष्यः आसीत्। अयं नागपुरीय तपागच्छीय भट्टारकः आसीत्।

ग्रन्थसमाप्तौ ग्रन्थकारस्य नामस्थानादिनामुल्लेखः एवं प्राप्यते।

श्रीमन्नागपुरीयतपगच्छाधिपभट्टारकश्रीहर्षकीर्तिसूरिविरचितं स्वोपज्ञधातुपाठविवरणं सम्पूर्णम्।
समाप्तेयं धातुतरङ्गिणी स्वश्रेयसे कल्याणमस्तु।

धातुतरङ्गिण्याः टीकायाः हस्तलिखितानि पुण्यपत्तने भाण्डारकर-प्राच्यविद्या-संशोधन-केन्द्रम् तथा राजस्थान-इतिहास-संशोधन-मण्डलमित्यत्र कानिचन हस्तलिखितानि लब्धानि तथा च राजस्थानप्रदेशे राजस्थान-इतिहास-संशोधन-मण्डल-जोधपुरमित्यत्र हस्तलिखितचतुष्टयं प्राप्तम्। अस्मिन् शोधकार्ये एतासां प्राप्तटीकानाम् अध्ययनं सम्पादनञ्च क्रियते येन ग्रन्थस्यास्य गूढं तत्त्वं ज्ञातुं

---

१. [1] आ.बलदेव उपाध्याय, संस्कृत वाङ्गमय का बृहत इतिहास- खण्ड १५ (व्याकरण खण्ड) पृष्ठ क्र.४५७

सहृदयाः प्रभवेयुः तदर्थमयं शोधप्रस्तावः प्रस्तूयते। प्रथमं हस्तलिखितं भाण्डारकर-प्राच्यविद्या-संशोधन-केन्द्रम्-पुणे इत्यत्र प्राप्तम्, हस्तलिखितेऽस्मिन् 68 (Folios) पत्राणि सन्ति। द्वितीयं हस्तलिखितमपि तत्रैव प्राप्तम्। **राजस्थान-इतिहास-संशोधन-मण्डल-बीकानेर इत्यत्र** तृतीयं हस्तलिखितं तथा अन्यानि चत्वारि हस्तलिखितानि **राजस्थान-इतिहास-संशोधन-मण्डल-जोधपुरमित्यत्र** प्राप्तानि।

संशोधनविषयस्य आवश्यकता महत्वञ्च-

प्राचीनज्ञानस्य शोधः पुरातनहस्तलिखितमाध्यमेन भवति। तेभ्यः हस्तलिखितेभ्यः गूढज्ञानस्य अवबोधः भवति। प्रभूतानि हस्तलिखितानि संस्कृतभाषायां विरचितानि तेषु विविधानां शास्त्राणां विषयानाञ्च समावेशः वर्तते। पुरातनहस्तलिखितमाध्यमेन प्राचीनज्ञानस्य वर्तमानकाले उपादेयता इति संशोधनस्य मुख्योद्दिष्टम्। उपलब्धेयं टीका व्याकरणशास्त्रस्य विद्यते तस्मात् अस्याः हस्तलिखितमाध्यमेन व्याकरणशास्त्राय महानाधारः भवेत्। तेन नूतनज्ञानमुपलभ्येत। धातुनां तेषां विविधरूपाणामध्ययनाय अस्य महानुपयोगः भवेत् तथा च अनेन माध्यमेन पूर्ववर्तिनामाचार्यानां योगदानं व्यर्थं न स्यादिति हेतोरिदमध्ययनम्।

संशोधनस्य उद्दिष्टम्-

- हस्तलिखितस्य समिक्षणात्मकं पाठसम्पादनम्।
- धातुतरङ्गिणीगतस्य धातुप्रयोगानां प्रकाशनम्।
- संस्कृतभाषामाध्यमेन टीकायाः अध्ययनयोग्यता सम्पादनम्।
- प्राचीनहस्तलिखितानां प्रकाशनम्।
- टीकायाः तर्कशुद्धाध्ययनेन व्याकरणशास्त्राध्ययनाय सरलतायाः सुलभतायाः सम्पादनम्।

शोधपद्धतिः –

- अस्मिन् संशोधने मुख्यतया पाठसमीक्षणपध्दत्या अध्ययन करिष्यते। अपेक्षानुगुणं विमर्शः अवलम्बः करिष्यते।
- तदर्थम् आदौ हस्तलिखितानां सङ्कलनं करिष्यते।

- चितानां हस्तलिखितानां पाठसमीक्षणं करिष्यते।

सम्बन्धितपूर्वसंशोधनसाहित्यपरामर्शः –

- कु. योगीता छत्रे इति एका संशोधिका केवलं त्रीणि मातृकां स्वीकृत्य एतस्योपरि सम्पादनकार्यं कुर्वन्ति अस्ति।
- केवलं सारस्वतव्याकरणस्य सम्पादनं जातं वर्तते। सारस्वतव्यकरणधातुपाठस्य तथा तस्य टीकाविषये कार्यं न जातं अस्ति।

अन्तर्जालमाध्यमेन संशोधनविषयसम्बधितानां प्रकाशितानां हस्तलिखितानाम् अवलोकनं कृतम्।

- कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य ग्रन्थालयः।
- केन्द्रियसंस्कृतविश्वविद्यालयस्यग्रन्थालयः।
- राष्ट्रीयसंस्कृतविश्वविद्यालयस्य ग्रन्थालयः।
- मद्रासविश्वविद्यालयस्य ग्रन्थालयः।

अधोलिखितानि अन्तर्जालियस्त्रोतांसि हस्तलिखितान्वेषणाय अनुसन्धात्रा गवेषितानि।

1. https://archive.org
2. https://www.bharatiyakritisampada.nic.in/

एवमाहत्य पूर्वसंशोधने एतावतां हस्तलिखितपाठान् स्वीकृत्य पाठसम्पादनमध्ययनं वा न सञ्जातमिति अवगत्य विषयोऽयं संशोधनाय स्वीकृतः।

प्राक्कल्पना –

- धातुतरङ्गिण्याः समीक्षात्मकं अध्ययनम्।
- धातुतरङ्गिण्याः समीक्षात्मकं सम्पादनम्।
- धातुतरङ्गिण्याः ज्ञानेन सारस्वतव्याकरणे उपयुक्तधातुनाम् अवबोधनाय तथा च व्यवहारेऽपि उपयुक्तं वर्तते।

व्याप्तिः मर्यादा च –

हस्तलिखितेषु कालानुक्रमेण विभाजनं कृत्वा समीक्षणात्मकमध्ययनेन धातु तेषां विविधलकारे प्रयोगः च इत्यादिनां घटकानां विचारः क्रियते।

सारस्वतधातुपाठस्य प्राप्तासु टीकासु धातुतरङ्गिण्याः चितानाम् एकादश हस्तलिखितानां पाठसम्पादनम् अत्र क्रियते।

प्रकरणविभागः -

उपोद्घातः

प्रथमं प्रकरणम् –

- **हस्तलिखितशास्त्रपरिचयः तथा धातुतरङ्गिणीपरिचयः।**
  - हस्तलिखितशास्त्रपरिचयः
  - धातुतरङ्गिणीपरिचयः
  - ग्रन्थकारपरिचयः
  - ग्रन्थवैशिष्ट्याणि

द्वितीयं प्रकरणम्–

- **प्राप्तैकादशमातृकाणां परिचयः।**

तृतीयं प्रकरणम् –

- **धातुतरङ्गिणी ग्रन्थस्य पाठसम्पादनं समीक्षा च।**

चतुर्थं प्रकरणम् -

- **विशिष्ठधातुप्रयोगाणां समीक्षा उपादेयता च।**

निष्कर्षः उपसंहारश्च

सन्दर्भसूची -

१. Descriptive Catalogue of the Government Collections of Manuscripts, Vol. I; Part I GRAMMAR : (Non-Paninian School), Page no. 112-113, No, 167, 1869-70 B.O.R.I., POONA 4, INDIA 1983

२. Catalogue of Sanskrit manuscripts in the Bodleian Library, page no. 334

३. जिनरत्नकोषः, Vol. 1, p. 197.

४. आ.बलदेव उपाध्याय, संस्कृत वाङ्मय का बृहत इतिहास- खण्ड १५ (व्याकरण खण्ड) पृष्ठ क्र.४५७

सन्दर्भग्रन्थसूची

१. Descriptive Catalogue of the Government Collections of Manuscripts, Vol. I; Part I GRAMMAR : (Non-Paninian School)

२. Catalogue of Sanskrit manuscripts in the Bodleian Library

३. जिनरत्नकोषः, Vol. 1, p. 197

४. राजस्थान पुरातत्त्वान्वेषण मन्दिर के हस्तलिखित ग्रन्थों की सूची भाग १, पृष्ठ क्र. ७५, प्रकाशक- राजस्थान राज्याज्ञानुसार, संचालकः, राजस्थान पुरातत्वान्वेषण मन्दिरं, जोधपुर (राजस्थान)

५. पाटण श्रीहेमचन्द्राचार्य जैन ज्ञानमन्दिरस्थित तपागच्छ जैन ज्ञानभण्डारना हस्तलिखित ग्रन्थोनुं सूचिपत्र, पृष्ठ क्र. १२२

६. आ.बलदेव उपाध्याय, संस्कृत वाङ्मय का बृहत इतिहास- खण्ड १५ (व्याकरण खण्ड) पृष्ठ क्र.०७, ४५७

अन्तर्जालीयस्रोतांसि –

- https://archive.org
- https://www.bori.ac.in
- https://www.researchgate.net
- https://sodhganga.inflibnet.ac.in/simple-search
- https://www.sanskrit.nic.in/index.php
- https://sanskritdocuments.org
- https://www.slbsrsv.ac.in/home.asp
- https://www.wisdomlib.org/definition/yogavibhaga
- https://www.Nationalarchaives.in.com
- https://www.Abhilekh-patal.in.com
- https://www.Archaiveindia.com
- https://www.Digitalarchaives.com

- Catalogus catalogorum : an alphabetical register of Sanskrit works and authors
  https://archive.org/details/b30094124_0001/page/762/mode/2up?q=dh%C4%81tutara%E1%B9%85gi%E1%B9%87i
- textsCatalogue of Sanskrit manuscripts in the Bodleian Library
  https://archive.org/details/CatalogiCodicumManuscriptorumBibliothSanskritP2/page/n365/mode/2up?q=dh%C4%81tutara%E1%B9%85gi%E1%B9%87i

मार्गदर्शकः

डॉ. जयवन्तचौधरी

सहा. प्राध्यापकः, व्याकरण विभागः,

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम् (महाराष्ट्रम्)

शोधकर्ता

वीतरागबाळासाहेबवसवाडे